श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवरवरमुनिभिः अनुगृहीतम्

# ॥ श्रीदेवराजमङ्गळम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीदेवराजमङ्गळम् ॥

यश्चक्रे देवराजस्य मङ्गळाशासनं मुदा।
तं वन्दे रम्यजामातृमुनिं विशदवाग्वरम्॥

मङ्गळं वेधसो वेदिमेदिनीगृहमेधिने।
वरदाय दयाधाम्ने धीरोदाराय मङ्गळम्॥ १ ॥

वाजिमेधे वपाहोमे धातुरुत्तरवेदितः।
उदिताय हुतादग्नेरुदाराङ्गाय मङ्गळम्॥ २ ॥

यजमानं विधिं वीक्ष्य स्मयमानमुखश्रिये।
दयामानदृशे तस्मै देवराजाय मङ्गळम्॥ ३ ॥

वारिदश्यामवपुषे विराजत्पीतवाससे।
वारणाचलवासाय वारिजाक्षाय मङ्गळम्॥ ४ ॥

अद्यापि सर्वभूतानामभीष्टफलदायिने।
प्रणतार्तिहरायास्तु प्रभवे मम मङ्गळम्॥ ५ ॥

दिव्यावयवसौन्दर्यदिव्याभरणहेतये।
दन्तावलगिरीशाय देवराजाय मङ्गळम्॥ ६ ॥

पुरुषाय पुराणाय पुण्यकोटिनिवासिने।
पुष्पितोदारकल्पद्रुकमनीयाय मङ्गळम्॥ ७ ॥

काञ्चनाचलशृङ्गाग्रकालमेघानुसारिणे।
सुपर्णांसावतंसाय सुरराजाय मङ्गळम्॥ ८ ॥

भोगापवर्गयोरेकं वाञ्छद्भ्यो ददते द्वयम्।
श्रीमद्वरदराजाय महोदाराय मङ्गळम्॥ ९ ॥

www.prapatti.com

मतङ्गजाद्रितुङ्गाग्रशृङ्गशृङ्गारवर्ष्मणे।
महाकृपाय मद्रक्षादीक्षितायास्तु मङ्गळम्॥ १० ॥

श्रीकाञ्चीपूर्णमिश्रेण प्रीत्या सर्वाभिभाषिणे।
अतीतार्चाव्यवस्थाय हस्त्यद्रीशाय मङ्गळम्॥ ११ ॥

अस्तु श्रीस्तनकस्तूरीवासनावासितोरसे।
श्रीहस्तिगिरिनाथाय देवराजाय मङ्गळम्॥ १२ ॥

मङ्गळाशासनपरैः मदाचार्यपुरोगमैः।
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गळम्॥ १३ ॥

॥ इति श्रीदेवराजमङ्गळम् समाप्तम्॥

www.prapatti.com